**PERIODIC_TEST-01 (2025-26)**
**SANSKRIT (119)**

Class : X — Duration : 1 Hrs
Date : 05.08.2025 — Max. Marks : **25**
Admission No.: — Roll No.:

---

सामान्यनिर्देशाः

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 2 पृष्ठे मुद्रिते स्तः ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 6 प्रश्नाः सन्ति ।
3. प्रश्नानामुत्तराणि उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
4. उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
5. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

---

प्रश्न **01** वाच्यानुसारं उचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखित संवादं पुन**:** लिखत **-** **1X4=4**

दिव्या - **(i)** --------- कि खादसि**?**
तारा - मया फलम् एव **(ii)** ------------ ।
दिव्या - शोभनम्**,** कि त्वया दुग्धम् अपि पीयते **?**
तारा - आम्**,** अहं **(iii)** ---------- अपि पिचामि ।
दिव्या - मया तु रात्रौ भोजनं न क्रियते ।
तारा - अहम् अपि रात्री **(iv)** ---------- न खादामि।

प्रश्न **02** कालबोधकशब्दैः अधोलिखित कार्यक्रमं पूरयत: (केवलं प्रश्नत्रयम्) **-** **1X3=3**

(1) बालिका ----------- (1:00) वादने गायति ।
(2) तदा ------------ (5:30) वादने सा नृत्यति ।
(3) ----------- (7:15) वादने सा भोजनं करोति ।
(4) बालिका ----------- (8:45) वादने शयनं करोति ।

प्रश्न 03 अधोलिखितं पद्यांश पठित्वा निर्देशानुसार प्रश्नान् उत्तरत-

असंशयं महाबाहो। मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय। वैराग्येण च गृह्यते ॥

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½X2=1

(i) मनः काभ्याम् गृह्यते?
(ii) 'महाबाहो!' इति कथनेन कः सम्बोध्यते ?
(iii) दुर्निग्रहं चलम् च कः?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1X2=2

(i) मनः कीदृशम् अस्ति ?
(ii) अभ्यासेन च वैराग्येण कः गृह्यते?
(iii) 'कौन्तेय!' इति कथनेन कः सम्बोध्यते?

III. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1X2=2

(i) 'यस्य वशीकरणं कठिनम्' इति अर्थे किं पदं पद्यांशे प्रयुक्तम् ?
(ii) 'गृह्यते' इति क्रियापदस्य किं कर्तृपदम्?
(iii) 'वैराग्येण च गृह्यते' इति वाक्ये कर्तृपदस्य क्रियापदें किं अस्ति?

प्रश्न **04** अधोलिखितं गद्यांश पठित्वा निर्देशानुसार प्रश्नान् उत्तरत-

काकः - (प्रविश्य, सक्रोधम्) आः! किम् उक्तवती भवती। यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः? श्रीकृष्णस्य वर्णः कीदृशः? मुग्धे! अहं तु अतीव कर्तव्यपरायणः। प्रभाते का-का-ध्वनिना सुप्तान् प्रवोधयामि कर्मसु च विनियोजयामि।

राजहंसः - हूँ! किमनेन ? एतत् कार्य तु कुक्कुटोऽपि करोति ।

काकः - (विहस्य) कुक्कुटः। अरे अद्य कुतः कुक्कुटाः नगरेषु। अहमेव सर्वत्र सुलभः।

राजहंसी - भो भो वाचाल स्वीयैः कटुभिः क्वणितैः जनजागरणात् अन्यत् तु किमपि न करोषि ।

काकः - अहो अज्ञानं भवत्याः। यस्य गृहस्य भित्ती स्थित्वा आलपामि, जनाः प्रियस्य आगमनसंकेतं मत्वा हृष्यन्ति। किं बहुना ! अहम् तु एतादृशः सत्यप्रियः यत् मातरः शिशून् कथयन्ति - "अनृतं वदसि चेत् काकः दशेत्।" अस्माकं ऐक्यं तु जगत्प्रसिद्धम् । सर्वथा जागरूकोऽहं छात्राणाम् कृते आदर्शः एव ।

**I.** एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) **½X2=1**

(i) काकः प्रभाते केन ध्वनिना सुप्तान् प्रबोधयति ?

(ii) राजहंसी काकं किं सम्बोधयति ?

(iii) कुक्कुटाः कुत्र न दृश्यन्ते ?

**II.** एकवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) **1X2=2**

(i) मातरः काकविषये शिशून् किं कथयन्ति ?

(ii) अद्य नगरेषु के न दृश्यन्ते ?

(iii) जनाः कीदृशं हृष्यन्ति ?

**III.** निर्देशानुसारम् उत्तरत (केवलं प्रश्नद्वयम्) **1X2=2**

(i) 'कटुभिः क्वणितैः' अत्र किं विशेष्यपदम् ?

(ii) 'सत्यम्' अस्य विलोमपदं नाट्यांशे किं प्रयुक्तम् ?

(iii) 'कार्येषु' अस्य किं पर्यायवाचीपदं नाट्यांशे प्रयुक्तम् ?

प्रश्न **05** अधोलिखित वाक्येषु रेखांकित पदम् आधृत्य प्रश्न निर्माणं कुरुत – (केवलं प्रश्नचतुष्टयम्) **1X4=4**

**(1)** मनः अभ्यासेन गृह्यते।

**(2)** कामः एव अस्माकं शत्रु ।

**(3)** एकः मेषः जिह्वालोलुपतया महानसं प्रविशति स्म।

**(4)** अश्वाः प्राणत्राणाय इतस्ततः अधावन्।

**(5)** जगत्पतेः एषा सृष्टिः रमणीया अस्ति।

प्रश्न **06** अधोलिखितवाक्येषु रेखाङ्कितपदेषु काश्चन अशुद्धयः सन्ति, तेषां शुद्धरूपम् विकल्पेभ्यः चित्वा लिखत-
(केवलं प्रश्नचतुष्टयम्) 1X4=4

**(1)** मम पार्श्वे पञ्च पुस्तकाः सन्ति ।
(क) पुस्तकम् (ख) पुस्तकः (ग) पुस्तकानि (घ) पुस्तकस्य

**(2)** सः बालिका निपुणा अस्ति ।
(क) ते (ख) ता (ग) सा (घ) इमम्

**(3)** फलानि त्रयः सन्ति ।
(क) तिस्रः (ख) त्रयानि (ग) त्रीणि (घ) त्रिभ्यः

**(4)** वयं गुरून् नमामि ।
(क) नमावः (ख) नमाथः (ग) नमामः (घ) नमन्ति

**(5)** अहं तुभ्यं सत्यं कथयसि ।
(क) कथयति (ग) कथये (ख) कथयानि (घ) कथयामि

========================= समाप्तम् ===============================